कषायैः समुपाचरेत्" इत्यत्र लङ्घनपाचनयोः स्फुट एव भेदः। व्यायामोऽपि न कार्य्यस्तस्यातिनिषिद्धत्वात् अवस्थाविशेषे पुनः पार्श्वपरिवर्तनादिरूपः सोऽपि कर्त्तव्यः तस्माच्चतुःप्रकारा संशुद्धिरित्यादिश्लोके लङ्घनपदं कर्शनपर्य्यायमिति निर्णीतम्। अनशनरूपस्य लङ्घनस्य फलमाह "लङ्घनेन क्षयं नीते दोषे सन्धुक्षितेऽनले। विज्वरत्वं लघुत्वं च क्षुच्चैवास्योपजायते"। लङ्घनेन अनशनेन प्रवृद्धे दोषे क्षयन्नीते। यत आह "आहारं पचति शिखी दोषानाहारवर्जितः"। पचतीति सन्धुक्षितेऽनले आच्छादकदोषे क्षीणेऽग्नौ प्रदीप्ते यथोक्तसंप्राप्तिसामग्रीविघटनात् विज्वरत्वं शरीरस्य गौरवाभावेन लघुत्वम्। क्षुत् बुभुक्षा च जायते इत्यर्थः। अन्यच्चाह सुश्रुतः "अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम्। ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारणम्"। अनवस्थितदोषाग्नेः स्वस्थानादितो गतोदोषोऽग्निश्च यस्य तस्य ज्वरिणः काङ्क्षा अन्नाभिलाषः, रुचिः लङ्घनेनामपाकान्मुखशोषादिनाशे मुखस्य यत्प्रकृतत्वं सैव रुचिः शोभा। "रुचिः स्त्री दीप्तिशोभायामभीष्टार्थाभिलाषयोरिति" मेदिनीकारः" सम्यक्कृतस्य लङ्घनस्य लक्षणमाह "वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे। हृदयोद्गारकण्ठास्यशुद्धौ तन्द्राक्लमे गते। स्वेदे जातेऽरुचौ चापि क्षुत्पिपासासहोदये। कृतं लङ्घनमाद्देश्यं निर्व्यथे चान्तरात्मनि"। हृदयस्य शुद्धिरनवरोधः उद्गारशुद्धिः सधूमाम्लोद्गाराभावः। कण्ठस्य शुद्धिः कफानवलिप्तत्वम्। आस्यशुद्धिः मुखस्य प्रकृतरसत्वम्। तन्द्राक्लमे तन्द्रा च क्लमश्च तस्मिंस्तन्द्रा निद्रा क्लमोऽत्र ग्लानिः। क्षुत्पिपासासहोदये क्षुत्पिपासयोः सह युगपदुदये, अन्तरात्मनि मनसि। एतानि लक्षणानि मिलितान्येव सम्यक्कृतं लङ्घनं बोधयन्ति नतु प्रत्येकम्। हीनस्य लङ्घनस्य लक्षणमाह "कफोत्क्लेशः सहृल्लासष्ठीवनं च मुहुर्मुहुः। कण्ठस्य हृदयाशुद्धिस्तन्द्रा स्याद्धीन लङ्घने"। उपस्थितवमनत्वमिव कफोत्क्लेशः कफस्य वमनायोपस्थितिः। हृल्लासष्ठीवनं हृदयात्कफनिर्गमः। अतिशयितस्य लङ्घनस्य लक्षणमाह "पर्वभेदोऽङ्गमर्दश्च कासः शोषो मुखस्य च। क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्बल्यं श्रोत्रनेत्रयोः। मनसः संभ्रमोऽभीक्ष्णमूर्द्ध्ववातस्तमो हृदि। देहाग्निर्बलहानिश्च लङ्घनेऽतिकृते भवेत्। अरतिर्बलहानिश्च लङ्घनेऽतिकृते भवेत्"। कर्णनेत्रयोः दौर्बल्यं स्वविषयग्रहणासामर्थ्यम्। मनसः संभ्रमः भ्रान्तिः। ऊर्द्ध्ववातः उद्गारबाहुल्यम्। हृदि तमः अन्धकारप्रविष्टस्येवाज्ञानम्। बलरक्षणेन लङ्घनं कारयेदित्याह "बलाविरोधिना चैनं लङ्घनेनोपादयेत्। बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः"। अयमर्थः। एनं रोगिणं बलाविरोधिना अनतिबलक्षयकारिणा लङ्घनेन उपपादयेत् कुत इति चेत्तत्राह। यदर्थमस्मै आरोग्याय अयं क्रियाक्रमः चिकित्सोपक्रमः। तत आरोग्यं बलाधिष्ठानं बलाश्रयमित्यर्थः। केषाञ्चिदनशनस्य निषेधमाह सुश्रुतः" "तद्धि मारुततृष्णाक्षुत्मुखशोषभ्रमान्वितैः। न कार्य्यं गुर्विणीबालवृद्धदुर्बलभीरुभिः। न क्षयाध्वश्रमक्रोधकामशोषचिरज्वरी"। तत् अनशनम् उल्वणमारुतयुक्तेन ज्वरिणा न कार्य्यं मारुतोऽत्र निरामोबोद्धव्यः। सामे मारुते लङ्घनं कार्य्यमेव यत आह तन्त्रान्तरे "अवश्यमेव कुर्वीत ज्वरी सामे समीरणे। लङ्घनं ह्यामपाकार्थं न तदूर्द्ध्वं यथा कफे"। तदूर्द्ध्वं आमपाकादूर्द्ध्वम्। अतएवोक्तम् "कफपित्ते द्रवौ धातू सहेते लङ्घनं बहु। आमक्षयादूर्द्ध्वमपि वायुर्न सहते क्षणम्"। आमस्य लक्षणमाह "आहारस्य रसः सारो यो न पक्वोऽग्निलाघवात्। आमसंज्ञाञ्च लभते बहुव्याधिसमाश्रयः"। तन्त्रान्तरे तु "आममन्नरसं केचित् केचित्तु मलसञ्चयम्। प्रथमं दोषदुष्टिं वा केचिदामं प्रचक्षते। अविपक्वमसंसक्तं दुर्गन्धं बहुपिच्छिलम्। सादनं सर्वगात्राणामामइत्यामशब्दितः। तेनामेन समायुक्ताः दोषा दुष्याश्च तादृशाः। तदुद्भवा आमयाश्च साम इति बुधैः स्मृताः"। तत्र सामस्य वातस्य लक्षणमाह, "वायुः सामो विबद्धाग्निः सादतन्द्रान्त्रकूजनैः। वेदनाशोथ निस्तोदैः क्रमशोऽङ्गानि पीड़येत्। विचरेद्युगपच्चापि गृह्णाति कुपितो भृशम्। स्नेहाद्यैर्वृद्धिमायाति मेघः सूर्य्योदये निशि"। विचरेद् युगपत् वायुरामश्चैककालं विचरेत् कुपितः सामो वायुः भृशमतिशयेन गृह्णात्यङ्गानीत्यर्थः। वातस्य तस्यैव निरामस्य लक्षणमाह "निरामो विशदो रूक्षो निर्गन्धोऽत्यल्पवेदनः। विपरीतगुणैः शान्तिः स्निग्धैर्जातिविशेषतः"।

अथ प्रसङ्गात्सामस्य पित्तस्य लक्षणमाह "पित्तं सामं भवेदम्लं दुर्गन्धं हरितं गुरु। अम्लिकाकण्ठहृद्दाहकरं श्यावं तथा स्थिरम्"। अम्लिका अम्बिलता (चुकीति)